**दिनाङ्क :- 21.07.2024** **सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य सायं सप्तवादने नवीदिल्ल्याः भारतमण्डपे विश्व-धरोहर-समितेः षट्-चत्वारिंशत्तमस्य अधिवेशनस्य उद्घाटनं करिष्यति।

- बांग्लादेशस्य सर्वोच्च न्यायालयेन सर्वकारीय-उद्योगेषु विवादास्पद-आरक्षणं निरस्तीकृतम्।

- अद्य गुरुपूर्णिमा अशेषे हि देशे आचर्यते।

- भारतीय-ऋतु-विज्ञानविभागेन अनुमानितं यत् गुजरात-राज्ये पञ्चविंशति-दिनांकपर्यन्तम् अतोऽपि अतिवृष्टिः भविष्यति, अथ उत्तराखण्डे अद्य श्वः च अतोऽपि अतिवृष्टेः सम्भावना वर्तते।

- महिला-एशिया-विंशति-प्रति-विंशति-क्रिकेट-चषके, श्रीलंकाया:-अन्ताराष्ट्रिय-क्रिकेट-क्रीडांगणे भारतीयदलेन संयुक्त-अरब-अमीरात दलम्, अष्टसप्तति: धावनांकै: पराजितम्।

## नरेन्द्रमोदी-विश्व-धरोहरदिवसः

प्रधानमन्त्री नरेन्द्रमोदी अद्य सायं सप्तवादने नवीदिल्ल्याः भारतमण्डपे विश्व-धरोहर-समितेः षट्-चत्वारिंशत्तमस्य अधिवेशनस्य उद्घाटनं करिष्यति। अस्मिन् अवसरे श्रीमोदी सभां सम्बोधयिष्यति। भारतदेशः प्रथमवारं विश्व-धरोहर-समित्याः सभायाः आतिथ्यं कुर्वन् अस्ति यद्धि अस्य मासस्य एकत्रिंशत्-दिनाङ्कपर्यन्तं भविष्यति। विश्व-धरोहर-समितिः वर्षे एकवारं समागमं करोति, अथ, विश्व-धरोहर-सम्बद्धं सर्वेषां विषयाणां प्रबन्धनम्, विश्व-धरोहर-सूच्याम् अभिलेखितानां स्थलानां निर्णयं च तस्याः दायित्वं भवति। अस्मिन् सत्रे, मुख्यतया, विश्व-धरोहर-सूच्यां नूतनानां स्थलानां नामाङ्कनस्य प्रस्तावाः, विद्यमानानाम् चतुर्विंशत्यधिक-एकशतम् विश्व-धरोहर-सम्पत्तीनां संरक्षणस्य स्थिति-प्रतिवेदनानि, अन्ताराष्ट्रिय-सहयोगः अथ विश्व-धरोहर-निधीनाम् उपयोगः इत्यादीनां विषयाणां चर्चा भविष्यति।

## बांग्लादेश सर्वोच्चन्यायालयः

बांग्लादेशस्य सर्वोच्च न्यायालयेन सर्वकारीय-उद्योगेषु विवादास्पद-आरक्षणं निरस्तीकृतम्। स्वस्य निर्णये न्यायालयेन आन्दोलनिरतान् छात्रान् कक्षायां प्रत्यागन्तुम् अपि आग्रहः कृतः।

## गुरुपूर्णिमा

अद्य गुरुपूर्णिमा अशेषे हि देशे आचर्यते। इदं पर्व आषाढ़मासस्य पूर्णिमायां आमान्यते। अस्मिन् पावने अवसरे जना: स्वीय-ज्ञानदीप-प्रज्वालितवतेभ्य: स्वनमनाञ्जलिं कार्तज्ञ्यभावं च प्रकटयन्ति। अवधेयं यत् दिवसोऽयं महर्षे: वेदव्यासस्य जन्मदिवसस्मणार्थं व्यास-पूर्णिमा इत्यपि कथ्यते। अस्मिन्नेव अवसरे भगवान् बुद्ध: बोध-गयायां बोधि-वृक्षस्याध: ज्ञानोदयस्यान्तरं प्रथमं प्रवचनं ददौ। भगवान् बुद्ध: बोधगयात: सारनाथं गत्वा पूर्णिमादिने स्व प्रवचनं ददौ।

-

## भारतीय-ऋतु-विज्ञान-विभागः

भारतीय-ऋतु-विज्ञानविभागेन अनुमानितं यत् गुजरात-राज्ये पञ्चविंशति-दिनांकपर्यन्तम् अतोऽपि अतिवृष्टिः भविष्यति, अथ उत्तराखण्डे अद्य श्वः च अतोऽपि अतिवृष्टेः सम्भावना वर्तते । विभागेन सूचितं यत् अग्रिम-पञ्च-दिन-पर्यन्तं कोंकण-क्षेत्रेषु, गोवायाम्, मध्यमहाराष्ट्रे, गुजराते, मध्यप्रदेशे च अतिवृष्टिः भविष्यति । छत्तीसगढे, कर्णाटकस्य बहुषु स्थानेषु अथ समुद्रतटीय-क्षेत्रेषु च अद्य अतिवृष्टेः पूर्वानुमानं कृतमस्ति । केरल तथा माहे,

मराठवाडा, तटीय आन्ध्रप्रदेश तथा यानम्, तेलङ्गानादिषु अपि अत्यधिकवृष्टिः सम्भवति।

## वित्तसङ्कल्पनासत्रम्-उपवेशनम्

सर्वकारेण अद्य नवदिल्ल्यां, संसदः वित्तसङ्कल्पनासत्रात् पूर्वम् सर्वदलीयसमागमः आहूतः। सत्रे संसदः द्वयोः सदनयोः सुचारुरूपेण कार्य-सञ्चालनार्थं सर्वकारेण सर्वेभ्यः राजनैतिकदलेभ्यः सहयोगः याचितः। सभायां उपस्थितेषु नेतृषु केन्द्रीय-मन्त्री राजनाथ-सिंहः, किरेन-रिजिजुः, अर्जुन-राम-मेघवालः, जे.पी-नड्डा, चिराग-पासवानः, रामदास-अथवले, तथा कांग्रेस-नेता जयराम-रमेशः तथा गौरव-गोगोई, एन्.सी.पीति दलस्य नेता प्रफुल्ल-पटेलः, डी.एम.के नेता टी.आर.बालू तथा तिरुचि सिवा, आम-आदमी-पार्टीति दलस्य नेता संजय-सिंहः, ए.आई.एम.आई.एम-सांसदः असदुद्दीन-ओवैसी आदयः सम्मिलिताः आसन् ।

## उत्तराखण्ड-रुद्रप्रयागः

उत्तराखण्डे अद्य प्रातः रुद्रप्रयागमण्डलस्य केदारनाथयात्रामार्गे चिद्वासस्य समीपे भूस्खलनेन त्रयः तीर्थयात्रिकाः मृताः, पञ्च जनाः वृणिताः । मृतानां मध्ये द्वौ महाराष्ट्रदेशस्य, एकः स्थानीयनिवासी च आसीत् । सर्वे भक्ताः

गौरीकुण्डतः केदारनाथं प्रति गच्छन्ति स्म । एन.डी.आर.एफ, एस.डी.आर.एफ, स्थानीय-आरक्षिबलं च शीघ्रमेव आपदुद्धारकार्यम् कृतवन्तः। मुख्यमन्त्री पुष्कर-सिंह-धामीः आहतानां कृते शोकसंवेदनां प्रकटयन् व्रणितानां कृते विस्तृत-चिकित्सासेवा प्रदातव्या इति निर्देशं दत्तवान्।

**केरला**

अद्य प्रात: केरलाया: मलप्पुरं जनपदे निपाह-विषाणु सड़्क्रमणेन पीडित: चतुर्वर्षीय: बाल: मृत्युमुपगत:। बालकस्य चिकित्सा कोझिकोड-चिकित्सालये भवति स्म। स: प्राणवायुसंयन्त्रे संलग्न: आसीत्। बालके निपाह-संक्रमणस्य पुष्टि: कोझिकोड – वायरोलोजी-प्रयोगशालायाम् अथ पूणे नगरस्य वायरोलोजी प्रयोगशालायाम् अभवत्। प्राय: षट्चत्वारिंशदधिक-द्विशत-जना: बालकस्य सम्पर्के आसन् येषु त्रिषष्टि: जना: संकटे सन्ति। केरलस्य स्वास्थ्यमन्त्रिणा वीणा जार्ज इत्यनया अवादी यत् निपाह-विषाणुप्रसारं निवारयितुं सर्वेऽपि उपाया: विहिता:।

**गुजरात अतिवृष्टि:**

गुजराते एन. डी. आर. एफ. इत्यस्य दशदलानि सूरत, नवसारी, वलसाड, दमन, दादरा नगर हवेली, पोरबंदर, जूनागढ़, द्वारका गिर सोमनाथ जनपदेषु

च संलग्नानि सन्ति। यतो हि तत्र अतिवृष्टि: जलौध: च प्रर्वतते, रक्तसञ्चेतना च प्रकटिता। नर्मदा, डांग, भरुच, तापी, राजकोट, जामनगर, अमरेली, भावनगर, कच्छ, दीव सहितेषु कतिपयजनपदेषु च नारंगीसञ्चेतना प्रकटिता।

**इजरायल-श्रीनेतन्याहु**

इजरायलस्य प्रधानमन्त्री बेञ्जामिन नेतन्याहु: उक्तवान् यत् ये आततायिन: देशस्य हानिं कर्तुम् इच्छन्ति ते स्वस्य आक्रामकताया: महत् मूल्यं प्रत्यर्पयन्ति। ध्येयमस्ति यत् एष: सन्देश: नेतन्याहुवर्येण दृश्यश्रव्यमाध्यमेन प्रदत्त:। यमनदेशे हुथीसैनिकदलस्य उपरि इजरालस्य आक्रमणस्य पृष्ठभूमित: श्रीनेतन्याहु: अमुं सन्देशं प्रकाशितवान्।

**भारतीय छात्रा: - बी. एस. एफ.**

भारतीय-सीमा सुरक्षा-बलेन अद्य प्रोक्तं यत्, ह्य: त्रिपुराया: एकीकृत-निरीक्षक-स्थलद्वयेन त्रि-सप्तत्यधिक-त्रिशतं भारतीय छात्रा:, अपि च त्रय: नेपालस्य छात्रा: बांग्लादेशात् भारतसीमां प्रविष्टवन्त:। धेयमस्ति यत् बांग्लादेशे प्रवर्तमान – आरक्षणविरोधी – हिंसात्मक प्रदर्शन-कारणेन ते च छात्रा: स्वदेशं प्रत्यागच्छन्ति।

## महिला-क्रिकेटस्पर्धा

महिला-एशिया-विंशति-प्रति-विंशति-क्रिकेट-चषके, श्रीलंकाया:-अन्ताराष्ट्रिय-क्रिकेट-क्रीडांगणे भारतीयदलेन संयुक्त-अरब-अमीरात दलम्, अष्टसप्तति: धावनांकै: पराजितम्। अत:पूर्वम्, रिचा घोषस्य अथ हरमनप्रीत कौरस्य अर्धशतक सहायेन भारतदलं विशंति-क्षेपचक्रेषु पंच-क्रीडिका हानौ एकोत्तर-द्विशत धावनांका: समार्जिता: आसन्। प्रत्युत्तररूपेण संयुक्त-अरब-अमीरात दलेन सप्तक्रीडिका हानि पुरस्सरं केवलं त्रयोविंशत्यधिक-एकशतं धावनांका: एव समार्जिता:। अनेन भारतदलं सूच्याम् उपरि वर्तते। अग्रिमा क्रीडा नेपालदलं विरुद्धय भविष्यति। अवधेयमस्ति यत् सा च क्रीडा उपान्त्य चक्रस्य चरमं सोपानमस्ति।